# Brahmakritam 05 Vishnu Stotram

# બ્રહ્મકૃતં પ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 05 Vishnu Stotram

File name : brahmakRRitaM05viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | AvantyakhaNDa | adhyAya 41/12-24||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# બ્રહ્મકૃતં ૫ વિષ્ણુસ્તોત્રમ્

બ્રહ્મોવાચ ।
દેવદેવ જગન્નાથ જગત્સૃષ્ટમિદં ત્વયા ।
ઋતે ત્વયા જગદ્વિષ્ણો નૈવાવસ્થાતુમર્હતિ ॥ ૧૨॥

શાસ્તા ત્વમસ્ય વિશ્વસ્ય વિશુદ્ધસ્ય ચ નાપરઃ ।
ત્વત્તોઽસ્તીદં જગત્સર્વં તસ્માત્ત્વમનુશાસય ॥ ૧૩॥

દેવદાનવગન્ધર્વાઃ સયક્ષોરગરાક્ષસાઃ ।
ત્વામૃતે પુણ્ડરીકાક્ષં વ્યાપિતાશેષવિગ્રહાઃ ।
પરસ્પરં વિનિઘ્નન્તિ તાંશ્ચ ત્વં રક્ષિતું ક્ષમઃ ॥ ૧૪॥

ત્વમસ્ય વિશ્વસ્ય ચરાચરસ્ય ।
સ્થિતેઃ સદા પ્રાણભૃદાત્મરૂપિણી ॥ ૧૫॥

ત્વયા ધૃતં સર્વમિદં જગદ્વૈ
યતસ્તતોઽસિ ત્વમુપેન્દ્રસંજ્ઞઃ ।
પ્રવેશનં વ્યાપ્તમિદં સ્વધામ યત્
ત્વમુચ્યસે વિષ્ણુરતો મુનીન્દ્રૈઃ ॥ ૧૬॥

નિવાસિતં વિશ્વમિદં ત્વયાદ્ય
વાસશ્ચ ધાતોરિતિ વાસુદેવઃ ।
તવાનુગં વિશ્વમિદં વિભુસ્ત્વ-
મશેષવિશ્વસ્ય વિભાસિ રાજા ॥ ૧૭॥

સેનાનુરૂપં જગદેવ યસ્મા-
દતઃ સ્મૃતસ્ત્વં કિલ વિશ્વસેનઃ ।
વિલેખનાદસ્ય ચરાચરસ્ય
કૃતેશ્ચ ધાતોસ્ત્વમતોઽસિ કૃષ્ણઃ ॥ ૧૮॥

જિતં ત્વયા દેવ જગત્ત્રયં ય-

જિતેશ્ચ ધાતોસ્ત્વમતોઽસિ જિષ્ણુઃ ।
તસ્માત્સમસ્તગ્રહલોકપાલં
જગદ્વિભો પાલય સર્વકાલમ્ ॥ ૧૯॥

ત્વમસ્ય સર્વસ્ય ભવાદિરાજ-
સ્તવાસ્તુ ભદ્રાસનમદ્વિતીયમ્ ।
પ્રદક્ષિણાવર્તનકસ્તુ શઙ્ખઃ
કરસ્થિતઃ શોભતિ પૂરુષસ્ય ॥ ૧.૪૧.૨૦॥

સુદર્શનં નામ તવાસ્તિ ચક્ર-
મતો હિ ગીતઃ કવિભિસ્તુ ચક્રી ।
ધ્વજોઽસ્તિ તે દેવ સુપર્ણસેવિત-
સ્તથા સુપર્ણશ્ચ તવાસ્તિ વાહનમ્ ॥ ૨૧॥

તુરઙ્ગમાઃ સન્તુ તવારિસંહરે
તથા હૃષીકેશ સુદન્તદન્તિનઃ ।
કિરીટનિષ્કાઙ્ગદકર્ણપૂર-
કેયૂરહારોત્તમહેમસૂત્રૈઃ ॥ ૨૨॥

વિચિત્રવસ્ત્રોત્તમરક્તમાલ્યૈ-
ર્વિભૂષિતસ્ત્વં ભવ ભીમસેનઃ ।
શ્રિયા કદાચિચ્ચ ન મુચ્યતે ભવાન્
ભવન્તિ તે નિત્યમનન્તસમ્પદઃ ॥ ૨૩॥

તવાનુગા ભક્તિરિહાસ્તુ વૈ સતી ।
મુકુન્દભક્તે ત્વમતઃ પ્રસીદ મે ॥ ૨૪॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે અવન્તીક્ષેત્રમાહાત્મ્યે એકચત્વારિંશાધ્યાયાન્તર્ગતં
બ્રહ્મકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । આવન્ત્યખણ્ડ । અધ્યાય ૪૧/૧૨-૨૪॥

skandapurANa . AvantyakhaNDa . AvantyakhaNDa . adhyAya 41/12-24..

Proofread by PSA Easwaran

*Brahmakritam 05 Vishnu Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*